उदादिपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्तदीप्तौ । उज्ज्वलः ।

**ज्वल** त्रि० ज्वल–दीप्तौ वा अच् । दीप्तिविशिष्टे । [हेम० ।

**ज्वलका** स्त्री ज्वलतीति ज्वल–बा० वुन् । अग्निशिखायां

**ज्वलति** पु० ज्वल–भावे श्तिप् । ज्वलनक्रियायाम् । "भ्राजते" इत्याद्युपक्रम्य एकादश ज्वलतिकर्माणः निघ० २।१६। उक्तम् ।

**ज्वलन** त्रि० ज्वल–ताच्छील्यादौ युच् । १दीप्तिशीले, २वह्नौ ३चित्रकवृक्षे च पु० अमरः ।

**ज्वलनाश्मन्** पु० नित्यकर्म० । सूर्यकान्तमणौ राजनि० ।

**ज्वलित** त्रि० ज्वल–क्त । १दग्धे २दीप्ते च ।

**ज्वलिनी** स्त्री ज्वल–बा० इनि ङीप् । मूर्वालतायां राजनि०

**ज्वाल** पुंस्त्री ज्वल–ण । १अग्निशिखायाम् अमरः । २दीप्तियुक्ते त्रि० । ३दग्धान्ने स्त्री शब्दच० । भावे घञ् । ४ दीप्तौ पु० ।

**ज्वालखरगद** पु० ज्वालगर्दभाख्ये रोगे राजनि० । जालगर्दभशब्दे दृश्यम् ज्वालागर्दभामयोऽप्यत्र राजनि० ।

**ज्वालाजिह्व** पु० ज्वाला शिखेव जिह्वा यस्य दाह्यवस्तुलेहनसाधनत्वात् । १वह्नौ हेम० तन्नामनामके चित्रके च ।

**ज्वालामालिनी** स्त्री ज्वालानां शिखानां मालाऽस्त्यस्य इनि ङीप् । देवीभेदे । तन्मन्त्रादिकं तन्त्रसारे उक्तं यथा "ओं नमो भगवति ! ज्वालामालिनि ! गृध्रगणपरिवृते ! हुं फट् स्वाहा"। तत्राङ्गन्यासः । "ओं नमो हृदयं प्रोक्तं भगवतीति शिरः स्मृतम् । ज्वालामालिनीति च शिखा गृध्रगणपरिवृते ततः । वर्म स्वाहास्त्रमित्युक्तं जातियुक्तं न्यासेत्ततौ । प्रयोगस्तु ओं नमो हृदयाय नम इत्यादि "अभुक्तो नियतश्चैव जपेन्मन्त्रं जपाज्जयी । जपेदष्टसहस्रन्तु त्रयोविंशतिवासरान् । प्रत्यहं साधने सिद्धिमाददाति न संशयः । स्मृतिमात्रेण वै मन्त्री रिपून् सर्वान् विनाशयेत्" ।

**ज्वालामुखी** स्त्री पीठस्थानभेदे । "ज्वालामुख्यां महाजिह्वा देव ! उन्मत्तभैरवः । अम्बिका सिद्धिदानाम्नी स्तनौ जालन्धरे ममेति" तन्त्रम् । २विद्याभेदे "ज्वालामुखीक्रमं वक्ष्ये या पूज्या मध्यतः शुभे । नित्यारुणा मदनान्तरा मदमोहापकल्पप्रसिः । कमला श्रीभारती च आकर्षणी महेन्द्रापि । ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा । वाराही चैव माहेन्द्री चामुण्डेति च पूजयेत् । विजया चाजिता चैव मोहिनी चापराजिता । स्तम्भनी जयनी पूज्या कालिका पद्मबाह्यतः । ज्वालामुखी च संपूज्या विषादिहरणं भवेत्' । गारुड़० पु । २०४ अ० ।

**ज्वालावक्त्र** पु० ज्वालेव वक्त्रमस्य । शिवे ब्रह्मपु० ।

**ज्वालिन्** पु० ज्वल–णिनि । १शिवे "शिखी मुण्डी जटी ज्वाली मूर्त्तिजोमूर्द्धगो बली" भा० अनु० १७ अ० । २शिखायुक्तमात्रे ३दीप्तियुक्ते च त्रि० स्त्रियां ङीप् ।

**ज्वालेश्वर** पु० मत्स्यपु० उक्ते तीर्थभेदे ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यनिर्म्मिते वाचस्पत्ये जकारादिशब्दार्थसङ्कलनम् ।

---